

ॐ श्री रामजयम्

## ध्यान श्लोका:



हरे राम हरे राम राम राम हरे हरे |

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे || १ ||

शुक्लाम्बरधरं विष्णुं शशि वर्णं चतुर्भुजम् |

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये || २ ||

वागीशाध्या: सुमनस: सर्वार्थानामुपक्रमे |


यं नत्वा कृतकृत्या: स्यु: तं नमामि गजाननम् || ३ ||

दोर्भिर्युक्ता चतुर्भिः स्फ़टिक मणिमयीमक्षमालां दधाना |

हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ||

भासा कुन्देन्दु शङ्खस्फ़टिकमणिनिभा भासमाना समाना |

सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना || ४ ||



कूजन्तं राम रामेति मधुरं मधुराक्षरम् |

आरुह्य कविताशाखां वन्दे वाल्मीकि कोकिलम् || ५ ||

वाल्मीकेर्मुनिसिंहस्य कविता वनचारिणः |

श्रृण्वन् रामकथानादं को न याति परां गतिम् || ६ ||

य: पिबन् सततं राम चरितामृत सागरम् |

अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् || ७ ||



गोष्पदी कृत वाराशिं मशकी कृत राक्षसम् |

रामायण महा माला रत्नं वन्देऽनिलात्मजम् || ८ ||

अञ्जना नन्दनं वीरं जानकी शोक नाशनम् |

कपीशमक्षहन्तारं वन्दे लङ्का भयङ्करम् || ९ ||

उल्लङ्घ्य सिन्धोः सलिलं सलीलं य: शोक वह्निं जनकात्मजाया: |

आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् || १० ||

आञ्जनेयमतिपाटलाननं काञ्चनाद्रि कमनीय विग्रहम् |

पारिजात तरु मूल वासिनं भावयामि पवमान नन्दनम् || ११ ||

यत्र यत्र रघुनाथ कीर्तनं तत्र तत्र कृत मस्तकाञ्जलिम् |

बाष्पवारि परिपूर्ण लोचनं मारुतिं नमत राक्षसान्तकम् || १२ ||

मनोजवं मारुततुल्य वेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् |

वातात्मजं वानरयूथ मुख्यं श्रीरामदूतं शिरसा नमामि || १३ ||

य: कर्णाञ्जलि संपुटैरहरहः सम्यक् पिबत्यादरात्

वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु |


जन्म व्याधि जरा विपत्ति मरणैरत्यन्त सोपद्रवं

संसारं स विहाय गच्छति पुमान् विष्णो: पदं शाश्वतम् || १४ ||

तदुपगत समास सन्धि योगं सममधुरोपनतार्थ वाक्यबद्धम् |

रघुवरचरितं मुनिप्रणीतं दश शिरसश्च वधं निशामयध्वम् || १५ ||

वाल्मीकि गिरि संभूता राम सागर गामिनी |




पुनातु भुवनं पुण्या रामायण महानदी || १६ ||

श्लोकसार जलाकीर्णं सर्ग कल्लोल सङ्कुलम् |

काण्डग्राह महामीनं वन्दे रामायणार्णवम् || १७ ||

वेद वेध्ये परे पुंसि जाते दशरथात्मजे |

वेद: प्राचेतसादासीत् साक्षाद्रामायणात्मना || १८ ||

वैदेहीसहितं सुरद्रुम तले हैमे महामण्डपे

मध्ये पुष्पकमासने मणिमये वीरासने संस्थितम् | (सुस्थितं)

अग्रे वाचयति प्रभञ्जनसुते तत्वं मुनिभ्य: परं


व्याख्यान्तं भरतादिभि: परिवृतं रामं भजे श्यामलम् || १९ ||

वामे भूमिसुता पुरस्तु हनुमान पश्चात् सुमित्रा सुत:

शत्रुघ्नो भरतश्च पार्श्व दलयोर्वाय्वादि कोणेषु च |

सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्

मध्ये नीलसरोज कोमलरुचिं रामं भजे श्यामलम् || २० ||




नमोऽस्तु रामाय स लक्ष्मणाय देव्यै च तस्यै जनकात्मजायै |

नमोऽस्तु रुद्रेन्द्र यमानिलेभ्यो नमोऽस्तु चन्द्रार्क मरुद्गणेभ्य: || २१ ||

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि |


पौरुषे चाप्रतिद्वन्द्व: शरैरं जहि रावणिम् || २२ || (शरैनं or तदैनं)

मा निषाद प्रतिष्ठांत्वमगम: शाश्वती: समा: |

यत् क्रौञ्च मिथुनादेकं अवधी: काम मोहितम् || २३ ||

सकृदेव प्रपन्नाय तवास्मीति च याचते |

अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम || २४ ||



श्री हरये नम: श्री हरये नम: श्री हरये नम: जानकी कान्त स्मरणं जय जय राम राम ||

आपदामपहर्तारं दातारं सर्व संपदाम् | लोकाभिरामं श्री रामं भूयो भूयो नमाम्यहम् ||